**संस्कृतवार्ता:**

**दिनाङ्क :-19.08.2025** **प्रात: - 06:55**

**अथ वार्ताः**

**प्रधानमन्त्री उच्चस्तरीय उपवेशनम्**

प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः नेक्स्ट-जनरेशन्-रिफार्म्स् इत्यस्य प्रारूपस्य समीक्षार्थं उच्च-स्तरीय-सभायाः अध्यक्षता कृता, उपवेशनं जीवन-व्यापारयो: च सुगमतां वर्धयितुं, सर्वसमावेशक-समृद्धिं प्रवर्धयितुम् उपायान गतिं प्रदातुं च केन्द्रितम् आसीत्। शासनं आर्थिकवृद्धिं च सुदृढीकरणाय, एतै: उपायैः नागरिकेभ्यः प्रत्यक्षलाभः सुनिश्चिताय च सुनियोजिताः उपायाः अधिकारिणः प्रधानमन्त्रीं सूचितवन्तः। एषा उच्च-स्तरीय-सभा प्रधानमन्त्रिणः स्वातन्त्र्य-दिवसस्य भाषणस्य अनन्तरं अभवत्, यत्र सः जी. एस्. टी.-सुधाररूपेण "दीपावलि-उपहारेण", कर-भारः न्यूनीकर्तुं प्रतिज्ञां कृतवान्। गृहमन्त्री अमितशाहः, रक्षामन्त्री राजनाथसिंहः, मार्गपरिवहनमन्त्री नितिन गडकरी, कृषिमन्त्री शिवराजसिंह चौहानः, वित्तमन्त्री निर्मला सीतारामनः, वाणिज्योद्योगमन्त्री पियूष गोयलः च भारतीयार्थव्यवस्थां, आधारभूत संरचना: च सुदृढीकरणाय इत्यादिषु विषयेषु आयोजिते सभायां भागम् गृहीतवन्तः।

**प्रधानमन्त्री-पुतिन्-**

रूसदेशस्य राष्ट्रपति: व्लादिमिर् पुटिन इत्येष: प्रधानमन्त्रिणं नरेन्द्रमोदिनम् अलास्कायाम् अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्पेन सह सद्यः एव जातस्य मेलनस्य विषये विवरणं प्रदातुं ह्यः दूरभाषया सम्पर्कम् अकरोत्। सोशल-मीडिया-सन्देशे श्रीमोदी रूसदेशस्य राष्ट्रपतिं विवरणानाम् आदान-प्रदानाय धन्यवादं प्रदत्तवान्, तथा च भारतम् युक्रेन्-संघर्षस्य शान्तियुतस्य समाधानाय निरन्तरम् आह्वानं करोति, अस्मिन् विषये सर्वविध प्रयत्नान् च समर्थयति इति दृढीकृतवान्। श्रीमोदी आशा प्रकटितवान् यत् आगामिदिनेषु राष्ट्रपतिना पुटिनेन सह निरन्तरं वार्तालापः भविष्यति इति।

**जयशङ्करः-चीन विदेशमन्त्री**

विदेशमन्त्री डा. एस्. जयशङ्करः ह्यः नवदिल्ल्यां चीनदेशस्य विदेशमन्त्रिणा वांग् यी इत्यनेन सह वार्तालापम् अकरोत्। उपवेशनस्य आरम्भे डा. जयशङ्करः द्वैपाक्षिकसम्बन्धान् कठिनकालात् अग्रे प्रवर्धनाय परस्परम् आदरः, संवेदनशीलता, अभिरुचिः इत्येतेषु त्रिआयामेषु अवधानं दत्तवान्।

आर्थिक-व्यापार:, तीर्थयात्रा, जन-सम्पर्कः, नदी-दत्तांश-आदानप्रदानम्, सीमा-व्यापार:, सम्पर्क:, द्वैपाक्षिक-आदानप्रदानेषु च चर्चाऽभवत्। डा. जयशङ्करः अवदत् यत्, चीनदेशस्य विदेशमन्त्री अद्य विशेषप्रतिनिधिना तथा राष्ट्रियसुरक्षा-परामर्शदेन अजितडोवालेन सह सीमाविषये अपि चर्चां करिष्यति इति।

**एन्. डी. ए.-राधाकृष्णन्-**

एन्. डी. ए. दलस्य उपराष्ट्रपतिपदस्य प्रत्याशी सी. पी. राधाकृष्णन्-वर्यः श्वः नामाङ्कनं करिष्यति। राष्ट्रिय-राजधान्यां श्री-राधाकृष्णन्-वर्यस्य आगमनानन्तरं ह्यः नवदिल्ल्यां एन्. डी. ए-पक्षनेतृभिः सह परिचयात्मकं मेलनं जातम्। सभायाः अनन्तरं नवदिल्ल्यां वार्ताहरान् सम्बोधयन् संसदीयकार्यमन्त्री किरेन रिजिजुः अवदत् यत्, सर्वे एन्. डी. ए. पक्षस्य नेतारः नामाङ्कन-प्रक्रियायां भागं ग्रहीष्यन्ति इति। मन्त्री अवदत् यत् अद्य एन्. डी. ए. संसदीयदलस्य उपवेशनं भविष्यति।

**शूटिंगस्पर्धा**

कज़ाकिस्तानस्य श्यामकेंट-इत्यत्र षोडशतमे एशियाई-चैंपियनशिप-स्पर्धायाः प्रथमे दिने भारतेन ह्यः द्वे-स्वर्ण-पदके त्रीणि रजत-पदकानि च विजितानि। सप्तदश वर्षीय: गिरीश गुप्ता इत्यनेन दश-मीटर-परिमिते एयर-पिस्टल-पुरुष-युवा-स्पर्धायां स्वर्ण-पदकं विजितम्।

**।।इति वार्ता:।।**